6

BIBLIOTHECA BUDDHICA. XXI.

# SPHUṬĀRTHĀ

# ABHIDHARMAKOÇAVYĀKHYĀ

THE WORK OF

## YAÇOMITRA.

## FIRST KOÇASTHĀNA.

EDITED BY

Prof. S. Lévi and Prof. Th. Stcherbatsky.

ПЕТРОГРАДЪ, 1918.

ПРОДАЕТСЯ ВЪ КНИЖНОМЪ СКЛАДѢ РОССІЙСКОЙ АКАДЕМІИ НАУКЪ И У ЕЯ КОМИССІОНЕРОВЪ:

**И. И. Глазунова** и **К. Л. Риккера** въ Петроградѣ; **Н. П. Карбасникова** въ Петроградѣ, Москвѣ; **Н. Я. Оглоблина** въ Петроградѣ и Кіевѣ; **Люзакъ и Комп.** въ Лондонѣ.

*Цѣна: 3 р. = 3 rbl.*

Напечатано по распоряженію Россійской Академіи Наукъ.

Апрѣль 1918 г. Непремѣнный Секретарь академикъ *С. Ольденбургъ.*

# Introduction.

The plan of undertaking this edition as part of a series connected with the elucidation of the Abhidharmakoça was conceived in 1912 at Paris on my return from a visit to India. During my stay at Calcutta and Darjeeling after the rains of 1911 I had the good luck of meeting Dr. Denison Ross, at that time director of the Medresse College at Calcutta and enjoyed the pleasure of his company and the honour of becoming friend to this energetic promotor in many a field of oriental research. Dr. Denison Ross was busy in deciphering new bits of Uighur Mss. sent over to Calcutta from Chinese Turkestan when the news reached him that Sir Aurel Stein had discovered in Turkestan and brought over to London an Uighur Ms. containing a complete work of considerable extent which, after examination, proved to be Uighur version of the Abhidharmakoça. The fact of this most abstruse and difficult work, which till then had resisted all endeavours of European elucidation at the hands of the greatest scholars beginning with E. Burnouf and others, — the fact of this work having been translated into Uighur could not but make an impression. It called for attention on the part of those scholars who devoted their labours to the discoveries in Turkestan, as well as on the part of those who were interested in the scientific litterature of the Northern Buddhists. The Uighur Ms. in question was made over by Sir Aurel Stein to Prof. S. Lévi at Paris. On being informed of Dr. Denison Ross's

interest in Uighur litterature Prof. S. Lévi made the following proposal: namely that Dr. D. Ross during his forthcoming leave should visit Paris where conjointly with other indianists then and there present a plan of combined work should be settled not only for the edition of the Uighur part, but likewise for the edition of the Abhidharmakoça itself, as it was quite clear that the Uighur translation would resist every attempt at comprehension as long as the work of Vasubandhu itself remained immersed in the greatest obscurity. So it happened that the Mss. discovered in Chinese Turkestan, having no great intrinsic value but being the scientific fashion of the day and gratifying the historical taste of European scholarship, had an unexpected result in promoting a serious attempt to analyse and translate an Indian çāstra, to study a scientific work for its own sake, leaving the historical point of view cherished by European science préalablement untouched. For Vasubandhu's Koça is a çāstra, and what a çāstra is, when it is constructed by a great Indian thinker, and how it is developed by his followers is well known and for an instance we have only to call to mind Pāṇini's, Kātyāyana's and Patañjali's grammatical çāstra.

The proposal was gladly accepted and it was immediately resolved to secure the participation of Prof. L. de la Vallée Poussin and Prof. U. Wogihara who both were known to have devoted much time and labour to the Abhidharmakoça.

Prof. S. Lévi confessed that the study of the Paris Ms. of the Abhidharmakoçavyākhyā had been for a long while his favourite pursuit and that he had some time ago already prepared a romanised transcript of the first koçasthāna along with a litteral French translation of it. But being at that period wholely taken up by other work he did not attempt the second chapter. However the work thus interrupted had been carried on by Prof. L. de la Vallée Poussin, who continued the study of Yaçomitra's Sanscrit text together with the Tibetan translation of Vasubandhu's kārikās and his bhāṣya. Prof. U. Wogihara had in pre-



paration a critical edition of the Sanscrit text of the vyākhyā, which he studied at the light of the Chinese translation of kārikā and bhāṣya as well as of the exegetic Chinese and Japanese litterature.

Dr. Denison Ross and myself began preparatory work devoting to it as much time as was then possible. A copy of the Nepalese Ms. of Yaçomitra's vyākhyā was obtained by Dr. Denison Ross, this we began reading together. He also began the study of Vasubandhu's work, the Koça itself, at the hand of both the Chinese translations of Paramārtha and Hiouen-Thsang. We derived great help from Mr. S. Yamakami, a Buddhist priest of the Zen sect, at that time lecturer at the Calcutta University. The acquaintance with Mr. S. Yamakami allowed us to see that some fixed tradition was living among the Buddhists of Japan regarding the system of philosophy embodied in Vasubandhu's çāstra. This tradition seemed to be in general trustworthy and enabled men like Mr. S. Yamakami to answer with precision many a question which appeared to European scholars veiled in hopeless intricacy.

I accordingly informed my pupil and friend, Mr. O. Rosenberg, at present lecturer at the University of Petrograd, of these facts, entreating him to direct his studies towards the exploration of the Buddhist litterature of Japan and highly recommending him to get into close contact with the traditional teaching prevailing in its Buddhist monasteries. From the field of research that opened before him Mr. O. Rosenberg has gathered valuable information. The result of Mr. O. Rosenberg's four years work in Japan is at present laid before us*). It consists in 1) a lexi-

*) *Introduction to the Study of Buddhism* according to Material preserved in Japan and China, by O. Rosenberg. — Part I. *Vocabulary.* A survey of Buddhist Terms and Names arranged according to Radicals with Japanese Readings and Sanskrit Equivalents. Supplemented by addition of Terms and Names relating to Shintō and Japanese History 1917. — Part II. *Problems of Buddhist Philosophy* 1918 (in Russian). («Oriental Series published by the Faculty of Oriental Languages of the University of Petrograd № 45».

cografical register giving the concordance of Buddhist technical terms as found in the special Buddhist lexicograpical litterature of China and Japan, 2) a work bearing the title: «Problems of Buddhist Philosophy» being an analysis of the fundamental principles of Vasubandhu's and, as a matter of fact, of all Buddhist philosophy. These two volumes are the first of a series appearing under the general title of an «Introduction to the Study of Buddhism, according to Material preserved in Japan and China».

It appeared that Japan preserves an immense litterature — written in Chinese explicatory of the Abhidharmakoça. This litterature, the outcome of the activity of Hiouen-Thsang and his school, seems to be lost in China. It remained unknown to the late Prof. Vassiljev as indeed it did to all other European sinologists. Not only were the works of Hiouen-Thsang's school carefully preserved and studied in Japan but moreover a considerable litterary activity was produced, the whole presenting a large bulk of trustworthy information, utterly unknown to European scholars and only partly touched even by Japanese writers in some works carried out according to the lines of European scholarship.

In conformity with the proposal of Prof. S. Lévi we met at Paris in December 1912. Prof. L. de la Vallée Poussin was prevented by his official duties from arriving at Paris and Dr. D. Ross went to Brussels and there secured his approval of the plan and promise of collaboration. Prof. U. Wogihara likewise informed us that he gladly adhered to the enterprise.

The plan which was provisionally settled at Paris — later alterations of course admitted as possible — is the following:

1) an edition of the Tibetan text of the Abhidharmakoça, kārikās and bhāṣya, 1st and 2d part by Prof. Th. Stcherbatsky, the remaining parts by Prof. L. de la Vallée Poussin[1]).

1) Of this the first part has already appeared in the Bibliotheca Buddhica series, № XX.



2) an edition of the Sanscrit text of Yaçomitra's vyākhyā, 1st part by Prof. S. Lévi, the second and following parts by Prof. U. Wogihara.

3) an edition of the Uighur version by Dr. Denison Ross.

4) an edition of both Chinese translations of Hiouen-Thsang and Paramārtha by Prof. U. Wogihara.

5) a French translation of the kārikās and bhāṣya by Prof. L. de la Vallée Poussin[1]).

6) a Russian translation of the same by Prof. Th. Stcherbatsky and priv.-doc. O. Rosenberg.

7) a French translation of the vyākhyā, 1st part by Prof. S. Lévi, the remaining by Prof. L. de la Vallée Poussin.

8) a systematical review of the philosophy embodied in Vasubandhu's work by priv.-doc. O. Rosenberg[2]).

9) an English translation of the kārikās and bhāṣya by Prof. Th. Stcherbatsky and priv.-doc. O. Rosenberg.

During summer 1913 Prof. S. Lévi visited Petrograd and brought his Ms. containing 1) the text of the 1-st chapter of Yaçomitra's vyākhyā retranscribed in Devanagari, 2) a partial reconstruction of Vasubandhu's Sanscrit text of the kārikā's and bhāṣya, 3) a litteral French translation of the first chapter of the vyākhyā. This Ms. represented his contribution in that stage which it had reached some time ago. Prof. S. Lévi entrusted the Bibliotheca Buddhica to make in it any alteration as would seem convenient.

My task has been chiefly to compare the Sanscrit text with the Tibetan translation, as embodied in the Tanjour. The result of this comparison will be given in critical notes which will appear at the end independently from the text, as the system of foot notes seemed cumbrous and presented some difficulties for

1) Of this the translation of the third koçasthāna in the publications the Academy of Brussels was already completed before the war, and the translation of the forth koçasthāna (karma) was at that time begun printing in the Muséon.

2) Of this two volumes as stated above have already appeared.

the printer. Not enough praise can be bestowed on the splendid work of the Committee of translators that achieved the Tibetan translation. It is a most accurate mirror of the original text; the cutting clearness of Tibetan style, its division of sentences makes its help invaluable, especially when a difficult work is preserved in a single Ms. and that in an almost hopelessly deteriorated state.

Proof sheets of the Sanscrit text were reiteratedly sent to Prof. S. Lévi at Paris, but postal intercourse between Petrograd and Paris proved to be impossible, no answer was obtained, neither could it be ascertained whether the proofs did at all reach Paris. In the mean while the issue could not be postponed, the printer was pressing: so it came that the present part appears without a revision by Prof. S. Lévi, under the sole responsibility of the joint editor for the many alterations introduced chiefly on the authority of the Tibetan translation. It must be hoped that a change in the political situation will allow Prof. S. Lévi to embody his observations at the end of the volume along with our critical notes.

This edition could be carried through press not without serious difficulties owing to the present state of war. It seems almost wonderful that it should have been brought to term at this time of public distress, when the very existence of the realm is at stake. It is a consolation if any that ever in times of the greatest calamities, external and civil war, during the reign of treachery, and looting, wholesale destruction of wealth accumulated through centuries, even now as in former ages, there still remains a body of men devoted to higher aims, working in the spirit that soars above the ocean of devastation threatening to flood the earth.

Amid these we must remember in the first ranks the Academy of Sciences of Petrograd and its Perpetual Secretary and Member S. d'Oldenburg, towards whom we here acknowledge a debt of gratitude for his never failing readiness to assist and promote every effort, every scheme that holds a promise of widening the scope



of scientific research. To his undefatigable good will and unrelenting energy we owe the appearance of the present edition in these difficult times.

The figures in margin refer to my edition of the Tibetan text of the bhāṣya in this series. Those in brackets to the Chinese translation of Hiouen-Thsang. The three figures at the top of the page refer 1) to the Chinese division of the koça in 30 fasciculi (chüan), 2) to the old division of Vasubandhu's work in eight chapters (koçasthāna) a 3) to Hiouen-Thsang's subdivision of each koçasthāna. Thus **1**.I.1 means: first chüan, first koçasthāna, first subdivision. The first large figure is connected with the figures in brackets. Thus **1** and (2a—4) means: first chüan, fol. 2a, line 4.

These references to the Chinese are the contribution of Mr. O. Rosenberg; to him also as well as to S. d'Oldenburg I am indebted for assistance in reading the proofs. Some missprints have nevertheless found there way — I am sorry to say — in the Sanscrit text of the vyākhyā as well as in the Tibetan text of the kārikās and bhāṣya. A list of them is attached to this fasciculus. A strict appliance of the rules of sandhi has not been the aim of the editors, and the small stroke has been made the widest use of, even when it does not interrupt sandhi, for in the opinion of the editors no effort should be spared, which is likely to facilitate the reading of difficult çāstra texts.

Prof. Th. Stcherbatsky.

न्धकारशब्दः शौण्डादिषु पठ्यते ' शौण्डादीनामाकृतीकृतत्वात्तत्रास्यानुप्रवेशो ऽवगन्तव्यः। सप्तमीति योगविभागाद्वा। उत्सर्गेण वा समासः। सह सुपेति सुप इति वर्तमाने सुबन्तं सुबन्तेन सह समस्यते। यत्रेष्टमित्यकृतलक्षणो वा तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य इति। अनेन वा ' कार्यमुपसर्जनीभूतमन्धकारं सर्वस्मिन्नित्यनेनाभिसंबध्यते। सत्यम्। नान्धकारमनेनाभिसंबध्यते। अन्धकारघातस्त्वनेनाभिसंबध्यते। येन ह्यन्धकारघातेन योगाद्भगवान्हतान्धकारः स तस्यान्धकारघातः सर्वाधारो ऽवगन्तव्यः। पात्रेषु धूर्त इति। येन धौर्त्यलक्षणेन गुणेन योगादसौ धूर्तः सो ऽत्राधारः। एवमिहाप्यवगन्तव्यम्। अन्यथापि चेह संभवन्तं समासं पश्यामः। सर्वस्मिन्हतं सर्वहतं ' सर्वेण प्रकारेण सर्वहतं सर्वथा सर्वहतं ' सर्वथा सर्वहतमस्यान्धकारं ' अनेन वेति सर्वथा सर्वहतान्धकारः। एवं हतशब्दस्यान्धकारेण सामानाधिकरण्यं ' न च पूर्वनिपात इति ॥

सर्वेण प्रकारेणेति क्लिष्टाक्लिष्टान्धकारविगमतः। सर्वस्मिं ज्ञेये द्वादशायतनलक्षणे ' सर्वं सर्वमिति ब्राह्मण यावदेव द्वादशायतनानीति सूत्रे वचनात् ॥ किमत्र शार्वरं तमो
3.10 (1a—10) ऽन्धकारशब्देनोच्यते। नेत्याह ' अज्ञानं हि भूतार्थदर्शनप्रतिबन्धादन्धकारमित्यवगन्तव्यम्। अन्धकारशब्दो हि नैशे तमसि प्रसिद्धः। अन्धमिव जनं करोतीत्यन्धकारम्। सद्भूतघटपटादिरूपदर्शनप्रतिबन्धात्तत्साधर्म्यादज्ञानमप्यन्धकाराख्यां लभते ' भूतार्थदुःखादिसत्यदर्शनप्रतिबन्धात्। तच्चेति तदज्ञानम्। प्रतिपक्षलाभेनेत्यार्यमार्गलाभेन। विपक्षः क्लेशः ' विपक्षप्रतिघाताय पक्षः प्रतिपक्ष इति कृत्वा। अथवा ज्ञानमनास्रवमज्ञानप्रतिपक्षः ' तस्य लाभेन। अत्यन्तं सर्वथा ' सर्वत्र ज्ञेये ' पुनरनुत्पत्तिधर्मत्वाद्धतमसमुदा-
4.1 (1b—1) चारप्रहाणीकृतमित्यर्थः। अतो ऽसाविति भगवान्। प्रत्येकबुद्धश्रावका अपि। अभ्यर्हितत्वात्प्रत्येकबुद्धशब्दपूर्वनिपातः। काममित्यनुज्ञायाम्। न तु सर्वथेत्यक्लिष्टसंमोहानत्यन्तविगमात्। ननु च सर्वं सास्रववस्तु श्रावकप्रत्येकबुद्धानामपि बुद्धवत्प्रहीणम्। किमिदमुच्यते ' क्लिष्टसंमोहस्य तेषामत्यन्तविगम इति। तथा ह्युक्तं ' नाहमेकधर्ममप्यनभिज्ञायापरिज्ञाय दुःखस्यान्तक्रियां वदामीति ' तथा नाहमेकधर्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति। तस्माच्छ्रावकप्रत्येकबुद्धानामपि तद-



क्लिष्टमज्ञानं चक्षुरादिवच्छन्दरागप्रहाणात्प्रहीणमेव। अन्यथा हि श्रावकप्रत्येकबुद्धानां दुःखान्तक्रिया न भवेत्। सत्यम्। अस्त्येतदेवम्। प्रहीणमेव तेषां क्लिष्टवदक्लिष्टमप्यज्ञानम्। तत्तु तेषां चक्षुरादिवत्प्रहीणमपि समुदाचरति। बुद्धस्य तु प्रहीणं सन्न समुदाचरति। अत एव च विशेषितं ' पुनरनुत्पत्तिधर्मत्वाद्धतमिति। अन्यथा तत्सर्वथा सर्वत्र ज्ञेये प्रहीणमित्येवावक्ष्यत्। ये तु व्याचक्षते श्रावकप्रत्येकबुद्धानां क्लिष्टसंमोहमात्रविगमात्संक्लेशविनिवृत्तिरिति तदपव्याख्यानमेषां यथोक्तमिति प्रत्याचक्ष्यते। तथा ह्येषामिति विस्तरः। तथा हीति यस्मादित्यर्थः। अथवा तथेति यथा 4.4 (1b—3)
न सर्वथा तथेति। हिशब्दो हेतौ। एषामिति श्रावकप्रत्येकबुद्धानाम्। बुद्धधर्मेष्वावेणिकादिषु। अतिविप्रकृष्टदेशकालेषु चार्थेषु ' अतिविप्रकृष्टदेशेष्वतिविप्रकृष्टकालेषु च ' अनन्तप्रभेदेषु चाबुद्धधर्मस्वभावेष्वपि रूपादिष्वर्थेषु। भवत्येवाक्लिष्टमज्ञानं ' समुदाचरत्येव तदित्यर्थः। तत्र ये बुद्धधर्मा आवेणिकादयस्तेषु स्वभावपरमसूक्ष्मगम्भीरत्वाद्बुद्धादन्येषामज्ञानम्। यथोक्तम्। जानीषे त्वं शारिपुत्र तथागतस्य शीलस्कन्धं समाधिस्कन्धं प्रज्ञास्कन्धं विमुक्तिस्कन्धं विमुक्तिज्ञानदर्शनस्कन्धमिति भगवता पृष्टेन स्थविरशारद्वतीपुत्रेणोक्तं ' नो हीदं भगवन्निति। ये त्वन्ये ऽर्था रूपिणः परमाणुसंचितास्ते ऽतिविप्रकृष्टदेशा यदि भवन्ति ' ये ऽप्यविज्ञप्त्यरूपिणस्ते ऽपि यद्यतिविप्रकृष्टदेशाधारत्वादतिविप्रकृष्टदेशा भवन्ति ' तेष्वपि तेषामज्ञानं ' अनेकलोकधात्वन्तरितदेशत्वात्। श्रूयते हि स्थविरमौद्गल्यायनस्यातिविप्रकृष्टदेशमरीचिलोकधातुजातस्वमातृदेशापरिज्ञानम्। अतिविप्रकृष्टकालेष्वप्यतीतेष्वनागतेषु वा तेष्वर्थेष्वतिबहुकल्पान्तरान्तरितविनाशप्रादुर्भावत्वात्तेषां भवत्येवाज्ञानम्। श्रूयते हि स्थविरशारिपुत्रेण मोक्षभागीयकुशलमूलादर्शनात्प्रव्रज्यापेक्षिपुरुषप्रत्याख्यानम्। भगवता तु तस्य मोक्षभागीयं दृष्टमुक्तं च।

मोक्षबीजमहं ह्यस्य सुसूक्ष्ममुपलक्षये।
धातुपाषाणविवरे निलीनमिव काञ्चनम् ॥ इति ॥

स च पुरुषः प्रव्रजित इति। अनन्तप्रभेदेष्विति धातुगतिजात्युपपत्त्यादिप्रभेदे दुर्बोधेष्वर्थेषु। तेषामज्ञानं भवत्येव। तथा ह्याह।

सर्वाकारं कारणमेकस्य मयूरचन्द्रकस्यापि ।
नासर्वज्ञैर्ज्ञेयं सर्वज्ञज्ञानबलं हि तत् ॥

ज्ञानमिति । तान्येतानि चत्वार्यज्ञानकारणानि भवन्ति । तेषां कानिचिदेकं कानिचिद्द्वे कानि-
4.6 (1b–4) त्रीणि कानिचिच्चत्वारीति संभवतो योज्यानि ॥ इत्यात्महितप्रतिपत्तिसंपदिति वि-
स्तरः । आत्महिताय प्रतिपत्तिरात्महितप्रतिपत्तिः । आत्महितप्रतिपत्तेः संपदात्महि-
तप्रतिपत्तिसंपत् । फलनिष्पत्तिरित्यर्थः । सा चेयं संपदज्ञानप्रहाणसंपत्स्वभावा वेदि-
तव्या । परहितप्रतिपत्तिसंपदपि तथैव चर्चनीया । अपरे व्याचक्षते । आत्महित-
प्रतिपत्तिरात्महितप्रतिपादनमात्महितोपग्रह इत्यर्थः । तस्याः संपदात्महितप्रतिप-
त्तिसंपत् । एवं परहितप्रतिपत्तिसंपदपि व्याख्येया । सा पुनः सर्वदुःखोपशमनिर्वा-
4.9 (1b–5) णपरिप्रापणस्वभावा । संसारपङ्काज्जगदुज्जहारेति वचनात् । संसरणं संसार
आजवंजवीभावो जन्ममरणपरंपरेत्यर्थः । अथवा संसरन्त्यस्मिन्सत्त्वा इति संसार-
स्त्रैधातुकम् । संसारः पङ्क इव संसारपङ्कः पङ्कसाधर्म्यात् । अत आह । संसारो
हि जगदासङ्गस्थानत्वाद्दुरुत्तरत्वाच्च पङ्कभूत इति । पङ्को हि लोके ऽवसादात्म-
कत्वादासङ्गस्य स्थानम् । अत एव च दुरुत्तरः । चञ्चलत्वाद्वा पराश्रयोत्तरणीयत्वाद्वा
दुरुत्तरः । संसारो ऽपि हि तृष्णाभिष्यन्दितत्वादासङ्गस्थानं, दुरुत्तरश्च तस्मादेव दृष्टि-
विचिकित्साविष्पन्दितेन वा । बुद्धापाश्रयोत्तरणीयत्वेन वा दुरुत्तरः । तत्रावमग्नं ता-
दात्म्यानुप्रवेशतः समुदायावयवरूपतो वा । जगत्सत्त्वलोकः । अत्राणमनाक्रन्दम् । अनुक-
4.13 (1b–6) म्पमानः करुणायमानो भगवान् । सद्धर्मदेशनाहस्तप्रदानैः । सद्धर्मदेशनैव हस्ताः ।
तेषां प्रदानानि । उत्तरणीयबहुत्वाद्बहुवचनम् । तैर्यथाभव्यमत्युद्धृतवान् । यथाभव्य-
मित्यनुच्यमानमपि गम्यते, लोके तथादृष्टत्वात् । तद्यथा ब्राह्मणानानीय भोजयामा-
सेत्युक्ते, ये तत्र भोजयितुं शक्या ग्रामे नगरे वा संनिहितास्तानेव भोजयामासेति
गम्यते, सर्वलोकब्राह्मणानां भोजयितुमशक्यत्वात् । एवमिहापि यो जनो शक्यो
4.19 (1b–8) ऽत्युद्धर्तुं तमेवात्युद्धृतवानिति । अतो यथाभव्यमिति व्याचष्टे ॥ तस्मै नमस्कृत्येति
शिरसा प्रणिपत्य । क्रियास्पदीभूतत्वान्नमःशब्दस्य प्रणिपत्यार्थो नमस्कृत्यशब्दो



भवति । प्रणिपातश्च लोके शिरसा प्रतीत इति शिरसेत्याह । वाङ्मनोनमस्कारो ऽप्य-
त्रानुक्तसिद्धो गुणाख्यानपूर्वकत्वात्, मनस्कर्मपूर्वकत्वाच्च कायकर्मणः । तस्मायिति किं-
लक्षणेयं चतुर्थी । अत्र बहवो व्याख्यानकारा मुह्यन्ति । आचार्यगुणमतिस्तच्छिष्यश्चा-
चार्यवसुमित्र आहतुः । नमःशब्दयोगे चतुर्थी । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चे-
ति । तदेतदयुक्तम् । स्वतन्त्रस्य नमःशब्दस्य योगे सा चतुर्थी भवति । अस्वतन्त्रश्चायं
नमःशब्दः क्रियास्पदीभूतत्वात् । अत एव चानेनैवाचार्येण व्याख्यायुक्तौ, नमस्कृत्य मुनिं
मूर्ध्नेति कर्मलक्षणा द्वितीया प्रयुक्ता । तस्मान्न नमःशब्दयोगे चतुर्थीति । द्वितीयायाः
स्थाने चतुर्थी प्रयुक्तेत्यपरे । तदिदमेषामिच्छामात्रम् । न हि लक्षणमस्यास्तीति । केन
तर्हीयं चतुर्थी । संप्रदानलक्षणेयं चतुर्थीति व्याचक्ष्महे । कथं संप्रदानसंज्ञा । कर्मणा
यमभिप्रैति स संप्रदानमिति । चूर्णिकारेण कर्मशब्द उभयथा वर्ण्यते । पारिभाषिकं
कर्म लौकिकं चेति । तत्र यदा कर्तुरीप्सिततमं कर्मेति पारिभाषिकं कर्माश्रीयते तदा
कर्तुरीप्सिततमेन यमभिप्रैति स संप्रदानसंज्ञो भवति । ब्राह्मणाय गां प्रयच्छतीत्ये-
तत्सिद्धं भवति । यदा तु कर्म क्रियेति लौकिकं कर्माश्रीयते तदा क्रियया यमभिप्रैति
स संप्रदानसंज्ञो भवतीति । तदेतत्सिद्धं भवति, युद्धाय संनह्यति, पत्ये शेत इति ।
संनहनक्रियया युद्धमभिप्रैति कर्ता, शयनक्रियया पतिमिति युद्धादीनां संप्रदानसंज्ञा
सिद्धा भवति । तथेहापि नमस्कारक्रियया शास्तारमभिप्रैत्याचार्यः । तस्माच्छास्तरि
संप्रदानसंज्ञा । संप्रदानसंज्ञायां सत्यां संप्रदाने चतुर्थीति चतुर्थी भवति । एवं च कृत्वा,

पूर्वं प्रणम्य वदतां प्रवराय शास्त्रे ॥
प्रमाणभूताय जगद्धितैषिणे
प्रणम्य शास्त्रे सुगताय तायिने ॥ इति ॥

एवमादीनि काव्यशास्त्रान्तरोक्तानि शब्दरूपाणि सुनीतानि भवन्ति । यदि तर्हि संप्र-
दानसंज्ञैवेष्यते, नमस्कृत्य मुनिं मूर्ध्नेत्यत्र द्वितीया न प्राप्नोति । नैष दोषः । विव-
क्षातः कारकानि भवन्ति । यदा कर्मविवक्षा तदा द्वितीया । यदा संप्रदानविवक्षा
तदा चतुर्थीत्युभयमपि सिद्धं भवति ॥ यथार्थशास्त्र इति शास्त्रित्यौणादिकः शब्दः 4.16 (1b–8)

हि प्रज्ञा शास्त्रश्रवणात्तदर्थमनुसरति। तस्याः श्रुतमयी। श्रुतमय्याश्चिन्तामयी। चिन्ता-
6.2 (2a–10) मय्याः सास्रवा भावनामयी। तस्या अनास्रवा प्रज्ञा जायत इत्यनुक्रमः॥ तदयमि-
ति। तदिति वाक्योपन्यासः। अयमिति स्वलक्षणधारणत्वेन निरुक्तः पारमार्थिकसांके-
तिकाभिधर्मः। परमार्थधर्ममिति परमस्य ज्ञानस्यार्थः परमार्थः। अथवा सर्वधर्माग्र-
6.3 (2a–10) त्वात्परमार्थः। परमार्थश्चासौ धर्मश्च परमार्थधर्मः। धर्मलक्षणं वेति स्वसामान्यलक्षणं।
खक्खटलक्षणः पृथिवीधातुरनित्यं दुःखमित्येवमादि। तत्प्रत्यभिमुखः। प्रतिलम्भाय
प्रतिवेधायावबोधाय प्रतिबोधाय वाभिमुखो धर्मो ऽभिधर्मः। कुगतिप्रादय इति तत्पुरु-
षसमासः। ननु च लक्षणेनाभिप्रती आभिमुख्य इत्यव्ययीभावः प्राप्नोति। यदा ह्यभिर्लक्षणेन
सह समस्यते तदाव्ययीभावः। तद्यथा। अत्यग्नि शलभाः पतन्ति। शलभपतनमग्निना
लक्ष्यते। सो ऽग्निरस्य लक्षणम्। न त्वयं धर्मो ऽन्यस्य लक्षणं। किं तर्हि लक्ष्यः। स्व-
यमेवाभिमुख्यात्। शास्त्राख्यो ऽपि सांकेतिको ऽभिधर्मः प्रापणायाभिद्योतनाय वा नि-
र्वाणं धर्मलक्षणं वा प्रत्युपनिषद्भावेनाभिमुखः। किमङ्ग पारमार्थिक इत्यतस्तत्पुरुष-
6.4 (2b–1) समासेनाभिधर्म इति सिद्धं भवति॥ उक्तो ह्यभिधर्म इति स्वभावप्रभेदनिर्वचनतो
ऽवयवार्थो ऽवबुद्धः। समुदायार्थस्तु न तावदित्यतः समुदायार्थं पृच्छति। इदं तु शास्त्रं
कथमभिधर्मकोशमिति। तस्यार्थतो ऽस्मिन्निति। तस्याभिधर्मसंज्ञकस्य शास्त्र-
स्यानन्तरोक्तत्वाद्ग्रहणम्। अर्थत इति न व्यञ्जनत इति। अर्थतो ऽयमनुप्रवेशो न सा-
6.7 (2b–4) कल्येन। तस्माद्यथाप्रधानमित्यव्ययीभावः। अन्तर्भूतः प्रविष्ट इत्येतच्छास्त्रं मदीयं
तस्यार्थस्य कोशस्थानीयं भवति कोशसदृशम्। एतस्मिन्नर्थे षष्ठीतत्पुरुषसमासः।
6.9 (2b–4) अभिधर्मस्य कोशो ऽभिधर्मकोश इति। यत्र ह्यसिः प्रविशति स तस्य कोशः। अथवा
सो ऽभिधर्मो ज्ञानप्रस्थानादिरेतस्य मदीयस्य शास्त्रस्याश्रयभूतः। ततो ह्यार्षादभि-
धर्मादेतन्मदीयं शास्त्रं निराकृष्टम्। अर्थत इत्यधिकृतम्। अतः स एवास्याभिधर्मकोश
इत्येतस्मिन्नर्थे बहुव्रीहिसमासः। अभिधर्मः कोशो ऽस्येत्यभिधर्मकोशः। यतो ह्यसिर्नि-
राकृष्यते स तस्य कोश इत्येतच्छास्त्रमभिधर्मकोशमिति। समुदायार्थो ऽप्यस्यावगमित
6.13 (2b–6) इति सूचयति॥ किमर्थं पुनरभिधर्मोपदेशः। किं प्रयोजनमित्यर्थः। सप्रयोजनस्य



हि शास्त्रस्य प्रत्यासः साधुर्भवति। न निःप्रयोजनस्य। केन चायं प्रथमत उप-
दिष्टः। केन वायमभिधर्म आदितो देशितः। आप्तोपदिष्टस्य हि शास्त्रस्य प्रत्यासो
ऽर्हद्रूपः स्यादित्यभिप्रायः। प्रथमत इति विशेषणम्। भदन्तकात्यायनीपुत्रादीनां पिण्डी-
करणेन पश्चादुपदेशस्य सिद्धत्वात्। प्रथमतउपदेशे हि विवादः। यत इति विस्तरः। 6.14 (2b–6)
यतः कारणात्। आचार्यः शास्त्रकारः। अभिधर्मकोशं प्रत्यासशास्त्रम्। वक्तुं
प्रणेतुम्। आद्रियते आदरं करोतीत्यर्थः। एवं कृते प्रश्नद्वये ऽभिधर्मशास्त्रस्य सप्र-
योजनतामाप्तोपदेशतां च प्रदर्शयन्नाह॥ २॥

धर्माणां प्रविचय इति विस्तरः। यतो विना धर्मप्रविचयेन। रूपं वेदनानित्यं 7.4 (2b–8)
दुःखमित्येवमाकारेण। नास्ति क्लेशोपशमाभ्युपायः। अन्य इति वाक्यशेषः। स एव
तु क्लेशोपशमाभ्युपाय इत्यर्थादापन्नं भवति। तद्यथा। नाहारेण विना प्राणसंधारणोपाय
इत्युक्ते स एवाहारः प्राणसंधारणोपाय इत्यर्थादापन्नं भवति। तद्वदेतत्। यदि क्लेशो-
पशमो न स्यात्किं स्यादित्यत आह। क्लेशैश्च भ्रमति भवार्णवे ऽत्र लोक 7.6 (2b–9)
इति। अनेन क्लेशोपशमस्यावश्यंकर्तव्यतां दर्शयति। भवः संसार इत्येको ऽर्थः। भव
एवार्णवो भवार्णवः। मज्जनस्थानसाधर्म्यात्समुद्रकल्पो भवः। एतस्मिन्भवार्णवे ऽत्र।
प्रत्यक्षीकृतपञ्चोपादानस्कन्धलक्षणव्यतिरिक्तभवप्रतिषेधार्थमत्रग्रहणम्। अत्र लोको
भ्रमति तादात्म्यावस्थानात्। तादात्म्यावस्थानतो ऽपि ह्याधिकरणनिर्देशो दृश्यते।
तद्यथा। अन्यपादपानुपयोगेन पलाशेष्वारामः स्थित इति। वृत्तौ तु हेत्वर्थतां तृतीयायाः
सूचयता हेतुमणिचा हेत्वर्थ उक्तः। क्लेशाश्च लोकं भ्रमयन्तीति। अत इत्युद्दिष्टहेतु- 7.7 (2b–10)
प्रत्याम्नायः। यत एवमत उद्दिष्टो ऽभिधर्म इत्यर्थः। धर्मप्रविचयः क्लेशोपशमोपायो ना-
न्यो धर्म इत्यभिधर्मोपदेशकः संबन्ध इति। अत उक्तं तद्धेतोरिति। स एव हेतुस्तद्धेतुः।
तस्य तस्माद्वा तद्धेतोरिति। तस्य धर्मप्रविचयस्यार्थे हि धर्मोपदेशहेतुको धर्मप्रविचयः।
कथं नाम धर्मप्रविचयः स्यादित्यभिधर्म उपदिष्टः शास्त्रा बुद्धेनात एव। न हि वि- 7.9 (3a–2)
नाभिधर्मोपदेशेन शिष्यः शक्तो धर्मान्प्रविचयितुमिति। उदित इति वदेर्निष्ठायां
कृतसंप्रसारणस्यैतद्रूपम्। न त्विण उत्पूर्वस्य। अर्थायोगात्। उदित इत्युक्त उपदिष्ट

षडायतनव्यवस्थां युक्तरूपामनादृत्य ' जीवितेन्द्रियानन्तरं मनइन्द्रियं पठन्ति '
94.17 (23b–2) सालम्बनत्वात् । वेदनेन्द्रियादीनि हि सालम्बनानि तदनन्तरं पठन्ति ॥ जीवितेन्द्रि-
यादीन्येकादशेति ' जीवितेन्द्रियं ' वेदनेन्द्रियाणि पञ्च ' श्रद्धादीनि चेन्द्रियाणि
94.19 (23b–3) पञ्चेति । त्रयाणां च भाग इति ' श्राज्ञास्यामीन्द्रियादीनां नवद्रव्यात्मकानां मनइन्द्रियं
मुक्तान्यान्यष्टौ द्रव्याणि धर्मधात्वेकदेशः । चक्षुरादय पञ्च स्वनामोक्ता इति ' पञ्च
95.2 (23b–4) चक्षुरादयो धातवः पञ्चेन्द्रियाणि ' चक्षुरिन्द्रियं यावत्कायेन्द्रियम् । स्त्रीपुरुषेन्द्रिये च
कायेन्द्रियैकदेश एवेति पञ्च चक्षुरादिधातवः सप्तेन्द्रियाणि भवन्ति । सप्त चित्तधा-
तवो मनइन्द्रियमिति । एवं द्वादशाध्यात्मिका धातवो ऽष्टाविन्द्रियाणि भवन्तीति ।
95.3 (23b–5) द्वादशाध्यात्मिका धातव एव धर्मार्ध एव चेन्द्रियमित्यिवधारणात्पञ्च धातवो रूपा-
दयः ' तदन्यधर्मधातुप्रदेशश्च नेन्द्रियमिति सिद्धम् ॥ ४८ ॥

आचार्ययशोमित्रकृतौ स्फुटार्थायामभिधर्मकोशव्याख्यायां धातुनिर्देशो नाम प्रथमं कोशस्थानम् ॥ १ ॥

## Errata.

| Page. | Printed. | Correct. |
|---|---|---|
| 12.17 | °श्यानास्रवश्चेति | °श्यानास्रवाश्चेति |
| 13.18 | अनाभिधर्मि° | अनाभिधार्मि° |
| 14.14 | वेति | चेति |
| 18.11 | गृह्यमाना° | गृह्यमाणा° |
| 18.17 | पञ्चानं | पञ्चानां |
| 19. 4 | वाभिसंधाय | चाभिसंधाय |
| 19.13 | वावश्यं° | चावश्यं° |
| 19.16 | श्रद्धानुसारिमार्ग | श्रद्धानुसारिमार्गाणाम् |
| 19.17 | शेषानां | शेषाणां |
| 21.16 | इति । | इति ॥ |
| 22.10 | कप्पिकारणो | कप्पिकणो (?) |
| 23. 8 | ते | त |
| 26.24 | वैभाषिकाना° | वैभाषिकाणा° |
| 29. 1 | चालम्बनाण्यभि° | चालम्बनान्यभि° |
| 30.14 | प्रवाहेन | प्रवाहेण |
| 30.19 | गम्यते । | गम्यते ॥ |

